National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(63): 285-289
© 2025 NJHSR
www.sanskritarticle.com

**डा. सुजितमिश्र:**
बि.जे.बि स्वयंशासितमहाविद्यालय:,
भुवनेश्वरम्

**Correspondence:**
**डा. सुजितमिश्र:**
बि.जे.बि स्वयंशासितमहाविद्यालय:,
भुवनेश्वरम्

# आधुनिककाव्यधारायां संस्कृतसाहित्यं प्रतिकवि प्रपुल्लमिश्रस्यावदानम्

**डा. सुजितमिश्र:**

**शोधसार: -**

सुरभारतीसमुपासकनां समेषां सहृदयानां सुविदितमेवास्ति यत् आर्यजाते: साहित्येषु यस्य प्रथमवतारोऽद्यास्माकं सुरभारती भाषायामेव समजनि। पद्यगद्यानां प्रथमदर्शनं तु तावत् वैदिकसंहितास्वेव भवति।पद्यगद्यमिश्रितत्वादेव कृष्णयजुर्वेदस्य कृष्णत्वमुपपद्यते इत्यैतिहासिकः आमनन्ति । अस्यैव वेदस्य काठकमैत्रायण्यादिसंहितासु प्रचुररूपेण गद्यपद्यानामुपलब्धिर्दृश्यते। इत्थं धारवाहिकक्रमेण वैदिकसाहित्यात् लौकिकसाहित्यं प्रति पद्यगद्यकाव्यानां सुत्रं तु प्रचलति। लौविकसाहित्ये वाल्मिकीव्यासभासकालिदासमाघ-भारविश्रीहर्षदण्डीवाणभट्टसुबन्धुहेमचन्द्रादीनां कवीनां लालित्यं माधुर्यन्तु सहृदयानां हृदयगोचरीभुतमासीत्। इदानीमपि एतेषां काव्यानां माधुर्यमस्माभि: आस्वाद्यते। अर्वाचीनपद्यगद्यसाहित्येषु यानि यानि काव्यानि विरचितानि तेषुपद्यगद्यकाव्येषु कविश्रीप्रफुल्लकुमारमिश्रस्य काव्यानि अन्यतमानि सन्ति। आधुनिकसंस्कृतसाहित्ये 'गज्जल्', 'कव्वालि', 'लोकगीतम्", 'उपन्यास:', 'लघुकथा', 'जीवनी', 'आत्मकथा', 'यात्रावृत्तान्त:', 'हास्यकथा' इत्यादय: स्थानं प्राप्तवन्त:, येनास्य महत्त्वं स्वत: ज्ञायते । अधुना सेस्कृतवाङ्मये काव्यरचनाधाराया: यानि वैशिष्ट्यानि दृश्यन्ते, तानि अधोलिखितानि भवन्ति।

**कुटशब्दा:-** वैदिकपरम्परा, मातृभुमि:, चित्रकुरङ्गी, विभावा:, अनुभावा:, व्यभिचारीभावा:, नैसर्गिकी प्रेम, वर्णसङ्करै:, वेतसतरु:, शृङ्गाररस:, करुणरस:, शान्तरस: च।

१.०. उपक्रम:

वैदिकपरम्परात: आरभ्य: अद्यावत् पर्यन्तं संस्कृतकाव्यधारा प्रचलति। तत्तद्देशीयै: तत्तद्भाषाभि: स्वसाहित्यं समृद्धं कुर्वन्त: देशस्येतिहासं, संस्कृतिं, सभ्यताम्, समाजञ्च समृद्धमस्माकं पुण्यभूमौ भारतवर्षे भाषाणां वैविध्यं दृश्यते ।सत्यमस्यां स्थितौ सर्वेषां संस्कृतीनामाचारव्यवहाराणां पारस्परिकादानप्रदानार्थं तत्तद्भाषासु विरचितानां साहित्यानां सकलजन-बोधार्थम् सर्वजनादृत-सार्वकालिक-सार्वभौमिकभाषाया: उपयोगं कृत्वा 'अनुवाद:' समाजोपयोगितया स्वीकृत: । ओडिआभाषात: संस्कृते कृतानुवादकेषु अधोलिखिता: प्रसिद्धा: सन्ति । यथा-

१) हरेकृष्णशतपथी - धर्मपदम् ।

२) हरेकृष्णमेहेर: - तपस्विनी, प्रणयवल्लरी, मेघदूतम्, अर्घ्यस्थाली, वर्षा, गीतगोविन्दम् इत्यादि ।

३) गोपबन्धुमिश्र: - कनीयान् राजकुमार: ।

४) भागिरथीनन्द: - याज्ञसेनी, उल्ल«नम्, भारतवर्षम्, सृष्टितत

५) नारायणदाश: - वाजिराउतम्, वेदुइनगीतम्, सृष्टि:, वात्यासार:, सप्तपदी इत्यादि:।

**१.१ आधुनिककविषु कवि: प्रफुल्लकुमारमिश्र:**

स्वाधीनभारते एकविंशशतकस्यपूर्वार्धेऽस्मिन् आधुनिकसमकालिकसंस्कृतसाहित्ये स्थितेषु कविषु आचार्यप्रफुल्लकुमारमिश्रमहोदयानां नाम सादरं सर्वै: गृह्यते । कविसमवायेषु एतेषां काव्यं सदैवादरणीयं भवति । य: कोऽपि कवि:, यत्किमपि कव्यते सर्जनं करिति च तेन तस्य मातृभूमे:, संस्कृते:, सभ्यताया: प्रचार: प्रसारश्च जायते, साहित्यं समृद्धञ्च भवति। कवि: समाजे तादृशमेकां धारां प्रवाहयति, यस्यां धारायां सर्वे प्रवाहिता: भवन्ति।। तस्य सुक्ष्मातिसुक्ष्मानुभावनायां सर्वे रससिक्ता: भवन्ति।

आचार्यप्रफुल्लकुमारमिश्रमहोदय: अधुनिककविप्रवरेषु अन्यतम: यशस्वी प्रतिभावान् प्रौढाश्च कवि: वर्तते। अस्य रचना आधुनिककाव्यरचनाधारायाः नि:सृता काऽपि स्रोतस्विनीव सर्वजनहृदयभूमौप्रसरति।

**१.२ कवि: प्रफुल्लमिश्रस्य काव्यधारा–**

**चित्रकुरङ्गी -** 'चित्रकुरङ्गी' नाम्ना ग्रथिता काव्यमाला द्वात्रिंशत् (३२) अन्तरङ्गभावप्रसिद्धै:काव्यपुष्पै: शोभते । इयं काव्यकदम्ब: विदग्धकवे: मिश्रपादस्य स्वप्नकलिकानां विकशनरूप: भवति । कवि: ग्रन्थस्य पुरोवाक्-सन्दर्भेलिखति - सर्वासु दशासु मनुष्य: स्वप्नं पश्यति। चेतनाप्रवाहे दिल्लीत: पल्लीपर्यन्तं, सङ्गणकत: सम्भूतिपर्यन्तं च व्याप्तपरिसरस्य मन्थनं जायते । अस्मिन् काव्ये तस्योत्तोलनस्वर: स्पष्ट एवास्ति। मन्ये इङ्गितताकारवेदिन: सहृदया: सूचनामात्रेण तज्ज्ञास्यन्ति काव्येस्मिन् शोभमानोपशीर्षकाणि सन्ति तद्यथा - 'चित्रकुरङ्गी','स्वप्नसन्तरणम्", 'उर्वशी', 'स्वप्नदग्ध:', 'समुद्रस्वप्नम्", 'हे विस्मृते', 'गोपबन्धु:', 'परिवर्धते परिवञ्चना', 'अविचारिता', 'हा पिपासे हा पिपासे", 'सुभाषितं सुवासितम्", 'चन्द्रावली', 'त्यजतां त्यजतां इत्यादय:। चित्रकुरङ्गी' इत्युपशीर्षके कवे: रुचि: चित्राङ्कनाय आतुरीभवतितस्य जीवनं व्याकुलितश्च भवति। पद्मपुष्करिण्या: तटप्रदेशे एकस्मिन् कुटीरे आत्मानं चित्रिशल्पित्वेन प्राप्नोति। तुलिकामल्लकै: चित्रं विचिन्त्य एकस्या: कुरङ्ग्या: चित्रमङ्कयितुं रङ्गपटस्य पुरस्ति÷ति। अपूर्व: नैसागकसुषमामण्डि-तोऽसौ पर्वत: कवे: लक्ष्यं तु कुरङ्गया: चित्राङ्कनम् ।

एतदभ्यन्तरे कवि: आत्मन: मन: कुरङ्गत्वेन परिकल्प्य प्रेम्णा तां कुरङ्गीमन धावति । कुरङ्ग्या: विचित्रं चित्रं वर्णसङ्करै: चित्रयितुं तस्या: प्रतिभावमवलोकयति।' स्वप्नसन्तरणम्'कवितायां कवि: एकस्या: व्योमयान-बालायास्तथा च व्योमयानचालकस्य स्वप्रिल-प्रेमसन्दर्भं वर्णयति। अत्र मुवोतच्छन्दसा रचितानि त्रयस्त्रिंशत् (३३) पद्यानि प्राप्यन्ते। स्वप्ने सन्तरणमिति परिस्थित्यां शीर्षकमिदं मायामयजगत: अवास्तवचित्रमुपस्थापयति। अत्र कवि: एकस्या: व्योमयानबालाया: व्योमचालकस्य च अनिश्चितप्रेम्ण: दृष्टान्तं दशर्यति। कविना नैसर्गीकप्रेम कथं अनिश्चिततया प्रतिभातीति प्रतिपादितमत्र।

**'उर्वशी'** इति शीर्षके तस्या एव व्योमबालाया: व्योमचालकस्य मृषा प्रणयं वर्णयति । कवि: लिखति उर्वशी सा स्वर्गवेश्या आकाशो अभिनयं करोति, केवलं स्वस्योदरस्य पोषणार्थमेव । तत्र व्योमयाने तस्या: बालाया: देहसर्वस्वतायां केवलमभिनय: एव दृशयते । कुत्रापि आत्मीयता नास्ति । चालकस्य प्रचोदनया सा तं प्रति स्वानुगत्यं प्रदशर्यति । चालकोऽपि अस्याभिनयस्य विषये अनभिज्ञ: । इयं भवति प्रवञ्चना मिथ्या प्रेम तथा सर्वमिदं प्रहसनम् । चालकेन मनोरमा गृहाङ्गना विस्मृता । शिशूनां चपला क्रीडा स्मृतिपटलात् लुप्ता । विस्मृता वृद्धमाता । शृङ्गारकरुणरसयो: अपूर्व: कश्चित् समन्वय: अत्र प्रदर्शित:।

**परिवर्धते परिवञ्चना** - अस्मिन् पद्यकुसुमेऽपि कवि: समाजस्य दुरवस्थां सूचयति। कवि: जनेषु प्रवञ्चनाया: परिबृंहणं कथमवलोवोयते तत्सर्व चित्रयति । सर्वत्र मानवेषु स्नेह: लुप्त:, सुकुमारता अपसारिता तथा च परिवञ्चना परवा|धता दृशयते । प्रतिक्षणं प्रतिस्तरं हताशा एव हताशा। प्रतिमुहूर्तमपशकुनं श्रूयते दृशयते च। समाजस्य प्रमाणिकचित्रमत्र प्रदर्शितं कविना।

**अविचारिता–** अस्मिन् काव्येऽपि कवे: हताशभावना प्रतीयते ।सर्वत्र हताशा अनुभूयते। कवि: लिखति मीनव्यसनी कथं वा काञ्चनमूल्यं ज्ञातुं शवोनुयात्। हिताहितज्ञानं तस्य न भवति । उद्याने पुष्पसम्भार: वर्तते। तत्रोद्याने शृगालभल्लुकानां प्रवेश: सञ्जात:। अत्र कवि:प्रतीकात्मकतयावर्णयति यत् सुकुमारस्थलेषु कुटिला: राजनेतार: जनजीवनस्य ध्वंससाधनमेव कुर्वन्तीति । अत: तत्र मदमत्तता एव नृत्यं करोति । यदुक्तं भर्तृहरिणा-

पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तीभुतं जगत्।

हा पिपासे ! हा पिपासे ! -काव्येऽस्मिन् यौवनहीनमानवस्य दु:खदयन्त्रणा वर्ण्यते ।कविरत्र वदति कथं जराग्रस्थं जीवनं मुल्यहीनं भवति। समीपे करुणनिवेदनं करोति निन्दति च ताम्। । साधनं सर्व नष्टमस्ति । कान्ति: विलुप्ता वर्तते । निद्रा नास्ति । तथापि स: स्वप्नं पशयति । यद्यपि तस्य यौवनं समाप्तं, तथापि आशा तरुणायते ।

नष्ट साधनं नष्टाऽपि कान्ति: ।
गतायां निद्रायां कथं वा स्वप्न: ।। (ब्रह्मनिलये-१८)

**चन्द्रावली –** अस्यां कवितायां पद्यावलिद्वयं काव्येऽस्मिन् स्थानं प्राप्नोति। चन्द्रावली भगवत: कृष्णस्य वृन्दावनसखीषु अन्यतमाऽऽसीत्। या बार्धवोये वृन्दावनस्य नीरसतां गोपग्रामस्य नीरवताञ्च अनुभवति। तया यमुना, कालीयविषधरतनुतीर्णता, शयामवर्णगगनम्, वेतस-तरुलता,कदम्बवृक्ष:,शरत्काल:, हिमरिशम:, कृष्णाकर्षणम्, गोपग्राम:, सुवलसुदामप्रमुखानामुद्दामता, गवां वत्सतरीणाञ्च हम्बारव:, गोपिकारमणम्, नन्दयशोदावात्सल्यं, प्राङ्गणम्, कोकिलकूजनम्, कुञ्जवनम् इत्यादीनां शून्यता अनुभूयते।

चन्द्रावल्या: सितता लीना, सर्वत्र शयामता, जडता, सन्ताप:, उन्मत्तता, प्रौढता, तारुण्यशून्यता, स्मरविगा|हता, नीरवता, अन्धकारे प्रको÷े शान्ति:, शून्या: दिश: इत्येवं बहुधा औदासिन्यं कविना काव्येस्मिन् प्रकटितं श्रीकृष्णस्याभावेन । अत्र विप्रलम्भशृङ्गाररसस्य चरमवैशिष्ट्यमनुभवितुं शक्यते।

संसारे प्रवञ्चना वर्त्तते । कवि: संसारसागरे प्रवाहमानस्य प्रेमियुगलस्य अन्तिमगते: अन्वेषणं करोति । का गति: ? 'का गति:' स्वर्णहंसहिसिंन्यो: हेममृणालनालेषु चञ्चबद्धता सूच्यते कविना। संसार: बिषवृक्ष: भवति। अत्र संसार: हेममृणालनालत्वेन कल्पयितुं शवोयते।

**अन्वेषणम् -** अन्वेषणमिति पद्ये कवि: हुमाऊँशिलारण्येकस्यापि योगिन: अन्तश्चेतनायां गन्तव्यस्थलान्वेषणसन्दर्भ विचारं प्रस्तौति । श्वेतकेतु: कवे: कल्पित: योगी । अत्र कविना शान्तरसस्य प्रयोग: सम्यक् कृतो दृश्यते।

अत्र पद्ये मिश्रमहोदयेन हास्यरसस्य प्रयोगोऽपि कृत:। तद्यथा- टिभि वन्दे महागुरुम् पद्येऽस्मिन् टिभि नाम दूरदर्शनं किं कर्म किमकर्मेति अहर्निशं बोधयति। एतद् हासयति त्रासयति मोदयति मोहयति रोषयति रोदयतीतति कविना सूचितम्।

**परिव्राड्** -अनेन शीर्षकेण पद्यमालाद्वयं कविना उपन्यस्तम्। भ्रमणशील: भ्रमणदक्ष: परिव्राजक:। परिव्राजिकानामटनम् अटनमार्गे वोलेश:, अन्धकार:, वोलान्तचित्तवृत्ति:, घनारण्ये सान्द्रच्छाया,

शङ्का, हिमालयस्य हिमविद्रवणम् इत्यादय: मानसव्यथा-दायका: विषया: अत्र आलोचिता: वर्तन्ते । हज्-निमित्तं भ्रमणशील: वेदुइन् यायावर:, चतुर्धामसु (द्वारिका-रामेश्वर-पुरी-बद्रिकाश्रमेषु) भ्रमन्त: तीर्थयात्रिण: कविना स्मर्यन्ते ।

**'तव निलये '** इति कवितावलि: पञ्चाशत् (५०) काव्यसुमनै: समलङ्कृतमस्ति । अत्र कश्चन मनुष्य: स्वनिलये शयनरतोऽपि मनसा समग्र संसार पुन: पुन: भ्रमति । अन्ततो गत्वा स: वोलान्त: जायते ।एवं बहुविधभावना: क्रोडीकृत्य कवि: 'तव निलये' इति कवितामाध्यमेन स्वदु:खं शमयति । पुरोवाचि कवि: लिखति 'यद्यपि शिशनोदरपरायण आधुनिकमनुष्य: सुकुमारातिसुकुमारकाव्यं कर्तुं न प्रभवति तथापि केचनस्वप्रभुज: कवय: जञ्जालवहले घोरेऽपि पुष्पस्य सुरभिं कोकिलस्य कुहुतानमनुसरन्ति। नास्तीदानीं कालिदासस्य काल: येन प्रकृतिविभवचारुणा प्रफुल्लित: कश्चित् कविकर्मणि व्यापृत: स्यात्।

यदुक्तं-

तव निलये नीलनलिनीवनभ्रमे
किं करवाणि भो प्रियसजनि!
नीलनलिन्यां मनो मे रञ्जतितरां
तव गृहाङ्गने मङ्गलगानम्।। (ब्रह्मनिलये-४८)

इत्यत्र अनुभूयते अनुप्रासालङ्कारस्य शोभातितराम्।

**'मांसपुष्पम्'** इति शीर्षके कवि: मानवस्य शरीरं मांसस्य पुष्पमिव प्रतिपादयति । यथा पुष्पेषु कुत्रचित् अमृतं, कुत्रचिच्च विषम्, कुत्रचित् सौरभं कुत्रचिच्च तद्विपरीतं दृशयते । तथैव मांसेन निर्मिते मानवशरीरे कुत्रचित् कोमलता, कुत्रचिच्च विषता प्राप्यते । अस्मिन् सन्दर्भे कवि: राधिकाया: हृदयं, पूतनाया: स्तनपर्वतश्चेति विषयद्वयमुदाहृतम् ।

**'व्याघ्रस्य चयनम्"** इति शीर्षके कवि: मानवजीवनस्य रूपद्वयं प्रदशर्यति । सुरूपं कुरूपञ्चेति। मानवस्य कुरूपं दृष्ट्वा व्याघ्रेऽपि नेत्रनिमीलनं करोति। क्रूरहृदयमवलोवोय केवलं घ्रपयति, मुखं व्यावर्तयति च।

**"कर्णपुरी न हि चर्मपुरीयम्"** इत्यस्मिन् काव्ये कवि: उत्तरप्रदेशस्य कानपुरनगरे चर्मनिा|मतपादत्राणादिशिल्पकेन्द्राणि दृष्ट्वा तत्रत्यदूषित-वातावरणस्य वर्णनं करोति । कानपुरम् 'कर्णपुरी' इति नाम्नाऽभिधाय तत्र 'चर्म' व्यवसायाधिवोयात् प्राधान्येन व्यपदिष्टा भवन्तीति न्यायेन 'चर्मपुरी' इति तन्नगरस्य नाम प्रसिद्धम् ।

**"वाणीविहार:"** इति शीर्षकेऽस्मिन् कवि: ओडिशाराज्यस्य राजधान्यां भुवनेश्वरनगरे विद्यमानस्योत्व लविश्वविद्यालयस्य वाणीविहारस्य तात्कालिकचित्रमुपस्थापयति। वाणीविहारपरिसरे तरुणतरुणीनां छात्रछात्राणां समागम:, विशालप्रसादा:, पाठागार:, श्रेणीप्रकोष्ठा: इत्येतत्सर्वमत्रो-ल्लिखितम् । विश्व-विद्यालयप्रशासनेऽध्यापने च बहि: स्थानां प्रवञ्चकानां हस्तक्षेप:, मद्यपानां तत्र भ्रमणम्, राष्ट्रविशृङ्खला, कार्यालयपङ्गुता, दुष्टवटूनां (छात्राणां) शठसाधना इत्यादय: तात्कालिकाः समस्या अपि अत्र तेन प्रतिपादितम्।

कविना पुन: हास्यरसस्य प्रयोग: जामाता दशमोग्रहेति कवितायां कृत:। श्वशुरगुहे उषित्वा जामाता अखिलसंसारस्य सौख्यं अनुभवतीति तेन कथ्यते। जामाताया: सकलसेवापरिचर्याभ्यां श्वशूरश्वश्रुश्यालिश्या-लकादया: कलान्ता: श्रान्ताश्च भवन्ति । इत्थं जामाता दशमग्रहत्वेन शोभते नितराम्। तद्यथा-

श्वशुरगृहे निवासे शुमिष्टे भोजने रति:
श्यालिका कालका सौख्ये जामाता दशमोग्रह:।।(ब्रह्मनिलये-९८)

**ब्रह्मनाभि:**

ब्रह्म नाभौ यस्य स: ब्रह्मनाभिः । पूर्वसमुद्रमहोदधितीरे पुरुषोत्तमक्षेत्रे पुरीनगरे भगवत: श्रीजगन्नाथस्य महिमा विश्वविश्रुतोऽस्ति । तस्य विग्रह: दारुरूप:। दारुरूपेऽस्य विग्रहे अन्त:स्पन्दनं गभीरनाभौ स्थिते ब्रह्मणि जायते। अत्र शान्तरसस्य सम्भावना कृता कविना। निर्वेदस्थायीभावात् शान्तरसोत्पत्ति:। तत्र बिषयेषु अलंप्रत्ययत्वात् स्वात्माभिमानत्वात् निर्वेदभाव:।

अत्र सकलभवोतजनानामार्तनादं, मानसिकक्लेशविलापं वा श्रुत्वा कदाऽपि श्रीजगन्नाथस्य बहिर्दृशयमानदारुविग्रहे प्रतिक्रिया न भवति । मिश्रमहोदया: श्रीजगन्नाथ इव सर्वोऽपि मनुष्य: स्वीयबाह्यशरीरं दारुरूपेण निश्चलं प्रतिक्रियाहीनं च कृत्वा अन्तश्चेतनायां भावावेगमालोडयेदिति प्रतिपादयन्ति।

'शून्ये शून्यतां गते' इति काव्ये मनुष्यजीवने कथं शून्यताऽऽयाति, पूर्णाङ्गजीवनेऽपि जीवनस्य वैपरीत्यबोध: परमबैराग्यञ्च कथं जायते, तत्सर्वं प्रघटीक्रियते ।

**'एकावली'** कवितायां जीवनयात्रायां परस्परसंयुवोतता एकावलीवेति उपमीयते । 'अशोक:' इति कवितायाम् अशोकपुष्पस्य व्यवहार: साङ्केतिकरूपेण नायिकाया: व्यवहारेण सह उपमीयते । अशोक: पादाघातात् विकसतीति कविप्रसिद्धिंअस्ति।एवञ्च नायिकाया: नायकस्योपरि पादाघात: सूच्यते ।

**'अधमर्ण:'** इति शीर्षके मानवस्य व्यवहार: कीदृश: स्यात् तद्वर्ण्यते । व्यवहारेण मित्राण जायन्ते रिपवस्तथा। एतस्मिन् संसारे विविधासु अवस्थासु अथवा दशाविशोषेषु मनुष्य: आधमर्ण्यतां याति । परन्तु कालातीते पुन: तत्सर्वं दु:खं निलीयते । अत: विपत्समये यदि कश्चित् सहायको भवति, तर्हि तत्साहाय्यं स्वीकरणीयम् । तत्र नास्ति काऽपि विप्रतिपत्ति:।

**कोणार्के**

आचार्य: प्रफुल्लकुमार मिश्रमहोदय: “कोणार्के” इति प्रसिद्धं काव्यं व्यरचयत्।। प्रकृते: वैशिष्ट्यं तरङ्गायिते सागरे तारकिते गगने शयामलशष्प-वेष्टितवनालङ्कृतेषु पर्वतेषु च प्रामुख्येनावभासते। भगवत: परमेश्वरस्य मूलभूतं सौन्दर्यसंरचनं स्थूलकाव्यरूपेण भाति। तदर्थं तान्यवलोवोय जडस्यापि चेतसि कविप्रतिभा स्फुटा भवति। कोणार्कमन्दिरं दृष्ट्वा य: कोऽपि कवयति। तदनुगुणं कवि: प्रफुल्लकुमारमिश्र: वर्णयति कोणाकर्स्य अन्त: स्वरम् । यस्मिन् मन्दिरगात्रे युद्ध-प्रणय-रमण-गन्धर्वगानकौतुककला सुतरां सविस्तरं चित्रितम् । गच्छता कालेन कलिङ्ग: गङ्गशासनाधीन: सुसमृद्धिं गत:। तेषु लाङ्गुलानरसिंह: स्वमातु: धार्मिकीं भावनां पूरयितुं निर्ममेऽत्र सूर्यमन्दिरम्। अत्र कोणार्ककाव्ये कवे: मिश्रपादस्य

शृङ्गाररसप्रयोगवैदग्ध्यमनुभूयते। कुत्र च सम्भोगशृङ्गारसस्य कुत्र च विप्रलम्भशृङ्गाररसस्य परिपाकः कविना कृतो दृश्यते। शरत्पूर्णेन्दुचन्द्रिकैव आह्लादिनी इयं कोणार्ककाव्यकामिनी इत्यहं मन्ये।

**चित्राङ्गदा-**

महाभारते चित्राङ्गदा अर्जुनस्य पत्नीषु अन्यतमा । यदा अर्जु इन्द्रप्रस्थपक्षतः मैत्रीसन्देशं स्वीकृत्य मणिपुरराजधानीं जगाम, तदा तत्र राजकुमारी चित्राङ्गदा अर्जुनस्योपरि मोहिता अर्जुनेन प्रत्याख्याता ।कथामिमां आधारीकृत्य वीर-शृङ्गाररसयोः मिश्रणेन शृङ्गाराङ्गितया कविना चित्राङ्गदाऽऽख्यं काव्यं कृतम्।

**कृषकस्य कथा**

'कृषकस्य कथा' इति शीर्षकान्विते काव्ये कविः चन्द्रमुखेन आधुनिकयुगे कृषकस्य का दुरवस्था वर्तते तदुपस्थापयितुं प्रयत्नं विदधाति । अत्र अनुष्टुप् छन्दसा पञ्चत्रिंशत् शलोकाः विद्यन्ते । भारते कृषकात्महृतिः इति एका महती सामाजिकसमस्या अवलोवोयते । एषा समस्या एव विशिष्टतया कविनाऽत्र आलोचिता । कृषकाः सर्वकारपक्षतः उत्तमकृषिकार्यार्थमृणं स्वीकुर्वन्ति । किन्तु तद्धनं पुत्रस्य पठने, रोगोपचारे, गृहपोषणे कदाचित् समाप्तिर्भवति । अन्ततो तदृणं परिशोधयितुमसमर्थः कश्चन हृदाघातेन, अपरस्समृद्धरवोतचापेन, अन्यः चिन्तया कीटनाशौषधिसेवनं कृत्वा आत्मघातेन, कश्चन वृक्षस्य शाखायां गले रज्जुबन्धनं कृत्वाऽऽत्मघातेन चिरनिद्रां प्राप्तवान् । एवं हतस्वप्नानां तेषां कृषकाणां दारिद्र्यजीवनं बहुकष्टकरं भवति । कविः चिन्तयत्यत्र यथा कदाचित् अजैवसारदानेन प्रपीडिता भूमिः तस्मै शापं प्रयच्छति वा।कवितायां कारूण्यं आतनुतं कविना। करुणरसस्य धारा प्रवाहिता अत्र महोदयेन।

**चत्वारिशृङ्गा– -**

इन्द्रियाणां दासः सन् त्रिगुणेभ्यः मुवितमवाप्य मोक्षाधिकारी भवेदिति त्र+षीणामभिप्रायः । कविः वैदिकमन्त्रादस्मात् 'चत्वारि शृङ्गा' इति पदद्वयं स्वीकृत्य काव्यस्य शीर्षकं स्थापितवान् । शास्त्रीयं वाक्यं मनसि निधाय कविः लोकशास्त्राद्यवेक्षणाद् विश्वाससकलं जीवनसमग्रञ्च चतुस्सोपानमयं द्रष्टुमिच्छति । स्वस्य कविचेतनायाः शृङ्गाणि काव्यकदम्बेन परिणमन्ते । बहिः प्रकृतिमविगणय्य अन्तः प्रकृतौ स्तराश्च कविमानसे मुकुलिताः भवन्ति । फलतः मानसोद्धारार्थ कविः प्रजापतिः भूयः सकलं सम्पादयति । काव्यस्य सफलं रूपायनं कर्तुं प्रवर्तते ।

**इयं हि सा उज्जयिनी**

कविरत्र विक्रमादित्यस्य विक्रमतां, महाकालमहत्त्वम्, कालिदास-गौरवम्, शिप्रानदीपवित्रताम्, महाकालमन्दिरे रसिकवेशयायाः नृत्ये मुग्धान् चन्द्रगुप्तादीन् राज्ञश्च स्मरति । कालस्य चिरस्स्रोतसि सर्वं प्रवाहितं वर्तते।कवितेयमुज्जयिनीनगर्याः वैशिष्ट्यं तथा च ऐतिहासिकचित्रम् उपस्थापयति । अधुना कोऽपि कालिदासः तत्र न प्रादुर्भुत इति कवेर्मनसि वेदना जायते ।

**कालः पिबति तद्रसम् -** अस्मिन् काव्ये कविः कालस्यगतिविषये सूचयति । असौ कालः चेतनशीलतां पिबति । जीवस्य स्वारस्यं ग्रसती प्रामुख्येनात्रालोच्यते । ऋतुनां परिवर्तनं जायते । प्रतिदिनं जीवनं तथैव प्रसरति ।ग्रीष्म-वर्षा-शरत्-हेमन्त-शीत-वसन्तादीनां क्रमेण गमनागमनं चलति ।

**महावातस्तुतिः -** उत्कले सर्वदा प्राकृतिकविपर्ययः दृशयते । तत्र १९९९ तमे ख्रीष्टाब्दे महावातस्य प्रकोपेण प्रतारिता कविः चिन्तया काव्यमिदं रचितवान् इति प्रतिभाति । महावाते चिन्ता अत्रापि महाप्रभञ्जनस्यैव चित्रमुपस्थाप्यते । चक्रवातस्यागमनेन शासकाणां चिन्ता वर्धते । जनता सन्त्रस्ता भयभीता स्त्रियः समर्थपुरुषाः सर्वे मृताहताः भवन्ति ।

**वर्षा -** ग्रीष्मकालादनन्तरं समागतस्य वर्षाकालस्य सुन्दरचित्रं कविनाऽत्र उपस्थाप्यते । वर्षागमनेन वनस्पतयः उल्लसिताः भवन्ति । पर्वतस्य रोमहीनशरीरे शस्यशयामलरोमाञ्चः जायते। रोमाञ्चस्यागमनं बर्षागमने सर्वेषां भवति।

**वसन्तागमे**

अत्र वसन्तर्तोः वर्णनं क्रियते । ऋतुचक्रे तासां वैचित्र्यं विलोवोय कवेः मनः प्रव्रजति जङ्गम्यते च पूर्व पूर्व कालं स्मरति । वसन्तागमने सुरभिणा उन्मीलितं नेत्रं वसन्तस्य महोत्सवं पश्यति कोकिलस्य कुहुतानं श्रुणोति च ।

**सर्पस्तुतिः -**

अत्र कवेः वेदनापूर्णविषदग्धजीवनपथस्य दुर्दशाः वर्ण्यन्ते। साङ्केतिकरूपेण कविः सर्पस्य स्तुतिं दुर्जन-दुर्भेद्यकालानां संस्मरणपूर्वकं करोति । गर्गः, पीडा, त्रासः, मनोमन्थरता, धीरता, चलचञ्चलता, दुःखम्, उदासीनता, पक्षिणः छटपटस्वभावः, अजगरायमाणता, छलना, व्रणस्योत्खाटनम् इत्यादयः शब्दाः दुर्जनस्वभावजन्या एव भवन्ति। अतः सर्पस्तुतिः नाम दुर्जनस्तुतिः अथवा मिथ्यावादिन्याः नायिकायाः स्तुतिरति कथयितुं शक्यते।

**मनोजङ्गमे-**

आचार्य प्रफुल्लकुमारमिश्रमहोदयैः रचितमिदं काव्यं रहस्यात्मकं मानवीयजीवनशैलीं बोधयति। विकासस्य प्रक्रियायां मनुष्यस्य चेतनायाः विविधचरणेषु पदपातं कृत्वा जीवनयात्रां सफलीकरोति। एवं सर्व मानसिकगतिविधिविषयमुररीकृत्य कविः 'मनोजङ्गमे' इति काव्यं रचयामास। अत्र द्विचत्वारिंशत् कविताः विद्योद्यन्ते, यत्र दोलनशीलमानसिकस्थितेः चर्चा क्रियते । यदुक्तं-

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।।

एवञ्च दूरग्रामः, कविताभुवनेश्वरी, तथापि सत्यस्यमुखम्, गोधुलिः, चैत्ररजनी, धर्मपदीयम्, कुशभद्रामहाकाव्यम्, गाथामालिनी, काश्मीरोल्लासादयः नैकानि काव्यानि महोदयैः विरचितः। अपि च ओडिआभाषया हिन्दीभाषया एतेषां महोदयानां काव्यकविता असीत्। अनुवादग्रन्थाऽऽपिएतेभ्यः महोदयेभ्यः प्रकाशिताः। संस्कृतभाषायां नाटकानि विरचितानि यानि अप्रकाशितानि सन्ति।

**१.३ गद्यकाव्यधारायां कविप्रफुल्लमिश्रस्यावदानम्– -**

कविः प्रफुल्लमिश्रपादेन पत्रप्रियापरिव्रजकः' इति प्रमुखगद्यकाव्यद्वयं विरचितम्।। अनयोः गद्यकाव्ययोः सामान्यरूपेण समीक्षणं अत्र प्रबन्धे प्रस्तूयते।

पत्रप्रियायां गद्ये कविना पत्रपरम्परायाः नूतना दारा प्रवाहिता आविष्कृताश्च। अत्र त्रयत्रिंशत् पत्राणि कविना विरचितानि। शृङ्गाररसाप्लुतानि पत्राणि सहृदयानाहृदयवेद्यानि नास्त्यत्र सन्देहः लेशः।

### १.४ परिब्रजक: गद्यस्य विषयवस्तु / कथाया: स्वरूपञ्च

अस्मिन् गद्यकाव्ये कविना एकस्य साधारणमनुष्यस्य जीवनचरितं समुपस्थापितम् । तस्य नाम श्वेतकेतुरस्ति तस्य जीवनन्तु संघर्षयुक्तमस्ति परिवारस्य आत्मीय परिजना: तं विषप्रयोग कृत्वा नाशयितुं यतन्ते। अर्धचेतन दशायांविषप्रयोगेण मानसिकी अस्थिरता सञ्जाता। असौ श्मशाने कुत्रचित् वा नदी नटे भ्रमति। भगवत: आशीर्वलेन जीवनं लब्ध्वा नद्यां स्नानार्थं प्रविशति । परन्तु नद्यां जलप्रवाहे कुत्रचित् प्रवाहित: न जानात्यसौ ।

विषयस्य प्रारम्भे य: जन: श्वेतकेतु: परिव्राजकैव भ्रमति अन्तिमचरणे तस्य जीवने महान् खलुपरिवर्तन जानम् परिवाजकभावस्य सत्यत्वं प्रतिपादितम् । अत: गद्यकाव्यस्य नामकरणं परिवाजक: इति कविता दत्तम् ।

श्वेतकेतु: चिन्तयामास यत् संसारस्य मूलभूतं दु:खं न तावत् दारिद्र्यं न च दुर्नीतिरचिताज्ञानं परन्तु असत्यस्य राजत्वम् । अत: मनुष्य: कामक्रोधादीनां दासत्वं स्वीकरोति । धनार्जनमद: कामिनीमदश्य तं अनुदिनंनाशयति। अत: मनुष्यस्य मूलसमस्या भवति चेतनाया: जडत्वम् । अत: स आप्तपुरुषान् रक्षामात्यान् राष्ट्रस्य शासने संस्थाच्य स्वयमेव हिमाचलप्रदेशे साधनारत: सञ्जात: । तत: असौ दिव्यगुरु: संजात: ।

**रससिद्धान्त:-** अस्मिन् गद्यकाव्ये वीररस: अङ्गीरसत्वेन कविना संयोजितम्। अपरे रसा: शृङ्गारकरुणभयानकादय: अत्रापि अङ्गरससरूपेण सन्निवेशिता: सन्ति। वीररसस्य चत्वारभेदा: सन्ति। दानयुद्धधर्मदयावीराश्च । परन्तु राष्ट्रवीरस्य परिकल्पना अत्र कविना कृता।दशमस्तरङ्गे परमवैभवशाली राष्ट्रस्य परिकल्पना श्वेतकेतुना कृता दृश्यते ।

तस्य श्वेतकेतो: उक्ति:-

मम मातृभुमे: भ्रतरभगिन्यश्च जनतानुकुल्येन जनतन्त्र-बलेनश्च......इत्यत्र श्वेतकेतो: उत्साह: स्थायीभाव: परमबैभवशालि-राष्ट्रस्य परिकलपना अस्य आलम्वन बिभाव: तस्य राष्ट्रशासन-प्रणालीचेष्टाप्रभृतय: उद्दीपनबिभाव:। गोपालनं कृषिकर्माणि यान्त्रिकपद्धतीनामाविष्कार:आश्रमनिर्माणयोगाभ्यासादय: व्यभिचारी भावा: सन्ति अत: राष्ट्रवीररसस्योत्पत्ति:।

गद्यकाव्यस्य प्रारम्भे करुणरसस्य प्रभाव: दृश्यते। श्मशाने श्वेतकेतु: स्वपिति । श्मशानस्य चितानलेन शीतस्य हिमहस्तात् मुक्तिं लभते। पितरौ दिवंगतौ । आत्मीय-परिजना: परिजना: विषप्रयोग कृत्वा तं नाशयितुं यतन्ते। पितरौ दिवंगतौ। आत्मीय-परिजना: परिजना: विषप्रयोग कृत्वा तं नाशयितुं यतन्ते। अत्र स्थायी भाव: शोक:। श्वेतकेतो: दुरवस्था आलम्बनविभाव:। श्मशानशयनं, परिजनानां विषप्रयोग: शव ज्वलनसमीपे शयनादय: उदीपनविभाव:। श्वेतकेतो: अचेतनजडवत्काचचक्षुषा इतस्तत: दर्शनं अनुभाव: बिषोन्मादजड-ताचिन्तादय: व्यभिचारी भाव:। अत: करुणरसस्योत्पत्ति:।

**कविना शृङ्गाररसप्रसङ्गे वर्णितं यत्-**

न कदाचिदसौ चिन्तयति यत्तस्य जीवने वसन्तकालस्यागमनमभूत्। अभूतच्चशरच्चन्द्रस्य पूर्णप्रकाशितस्य नदीतीरस्य कशकुसुमहासस्य-पट्टिकामयं फरफरायितं जीवनम्। कोकिलस्य कुहुतानं मलयस्य मृदुमन्दस्पर्शनं हरिणाङ्गनानां विह्वलादृष्टि: पञ्चशरस्तु शराघातं अपि च कमलकोरकितं जीवनं कदाचित् चासीत्। आसीच्चावसर: चैत्यरजन्यां सुशीतले मलयमारुते अनङ्गपीडा अङ्गेनाङ्गं मीथुनीकृते अतिपीनस्तनपर्वतयो: चुचुम्ब्य घनजघनारण्ये बम्भ्रम्य रतिपङ्क-सरसि गिरिचरनागेव मदवारिणा वहुधा सिक्थ: रतिरणे पराभूतश्चासन्। तस्याश्चिकुरकेयूरे सुवासितद्रवस्य मृदुगन्धमाघ्रय वर्धते भूजङ्गता खेलितुं रतिखेल:।

अत्र रति: स्थायी भाव: । नायिका इप्सिता नायक: श्वेतकेतुश्चलम्बन विभाव:। कोकिलस्य कुहुतानं मलयस्य मृदुमन्दस्पर्शनं हरिणाङ्गनानां विह्वलादृष्टि: इत्यादय; उद्दीपनविभावा: सन्ति। श्चिकुरकेयूरे सुवासितद्रवस्य मृदुगन्धमाघ्रणं अतिपीनस्तनपर्वतयो: प्रदर्शनञ्चा-नुभावा: वर्त्तन्ते। चैत्यरजन्यां सुवासितमलयमारुते अनङ्गपीडा अतिपीनस्तनपर्वतयो: चुम्बनंसुरतक्रीडादयाश्च व्यभीचारी भावा: सन्ति। अत: सहृदयेषु सम्भोगशृङ्गाररसोत्पत्ति: अत्र भवति।

तथैव राजयोगस्य यत् पतञ्जलिना प्रवर्त्तितं पुन: हठस्य नाम ह-कार सूर्यनाडी-ठकार चन्द्रनाडी इत्यनेन प्राणायामं कृत्वा उन्मनीभावं प्राप्नुते साधक:। तथैव अष्टाङ्गयोगस्य प्रभावेण यमनियमासन-प्राणायामप्रत्याहारपूर्वकं साधक: धारणात: ध्यानं करोति। तत: स समाधिं निर्विकल्पकं सविकल्पकं वा लभते। येन अभ्यन्तरं प्रविश्य एकैकश: चक्रं भिनत्ति।

अत्र शम: स्थायी भाव:। परमात्मन: स्वरूपज्ञानं चक्रभेदनञ्च आलम्बनविभाव:। अष्टाङ्गयोगाचरणं तु उद्दीपनविभाव:। उन्मनी-भाव: साधकस्य अनुभाव:। अभ्यन्तरे पविश्य एकैकश: चक्रभेदनं निर्विकल्पकसविकल्पकश्च समाधिर्लाभ: सञ्चारीभावा: वर्त्तन्ते। अत: सामजिकेषु शान्तरसस्योत्पत्तिर्भवति।

### १.५ अलङ्कारविमर्श:-

यद्यपि गद्यकाव्येऽस्मिन् कविना सरलतरलभाषया सावहिततया पदानां प्रयोग: कृत: तथापि नास्त्यत्र समासवाहुल्यं अलङ्काराणाञ्च पाचुर्यम्। केषाञ्चन अलङ्काराणां प्रयोग:अत्र शोभतेतितराम्। यथा पञ्चमलम्बके अनुप्रासालङ्काराणां प्रयोगं करोति। तद्यथा-अभुच्चशरच्चन्द्रस्य, कासकुसुमहासस्य, कमलकोरकितम्,अङ्गेनाङ्गं, घनजघनारण्ये। स्वरस्य वैषम्ये अत्र व्यञ्जनवर्णानां भृशमुच्चारणम्। तथा अत्रापि रूपकोपादय: चकासन्ते।

**उपसंहार:-**

कवि: प्रफुल्लकुमारमिश्र: तत्कालिनसमाजे संस्कृतवाङ्मये च खलु कश्चन प्रतिभावान् महान् कवि:। तस्य काव्यकवितायां असाधारणजीवनचरित्रं चित्रितं दृश्यते।यत्र मृतप्राय: मनुष्य: यतमान: साधनया पूर्णाङ्गतां समधिगच्छति।कवे: सुक्ष्मातिसुक्ष्मनुभवं स्वकीयेषु काव्यकदम्वेषु प्रकाशितम्।

**सहायकग्रन्थसूची-**

मिश्र: प्रफुल्लकुमार:, ब्रह्मनिलये, धारा श्री राधा ट्रष्ट, २०२१

मिश्र: प्रफुल्लकुमार:, परिव्रजक:, धारा श्रीराधा ट्रष्ट

मिश्र: प्रफुल्लकुमार:, पत्रप्रिया, ज्ञानभारती पब्लिकेशन्, दिल्ली, २०२०